# Harishankarastotram by Sage Agastya

# અગસ્ત્યપ્રોક્તં પાપશમનં નામ હરિશઙ્કરસ્તોત્રમ્

## Document Information

Text title : harishaNkarastotram pApashamana by sage agastya

File name : harishaNkarastotrampApashamanaagastya.itx

Category : shiva, vishhnu

Location : doc_shiva

Transliterated by : Jonathan Wiener wiener78 at sbcglobal.net

Proofread by : Jonathan Wiener wiener78 at sbcglobal.net, NA

Description/comments : vAmanapurANa, adhyAya 88, shlokas 2-28

Latest update : December 31, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# અગસ્ત્યપ્રોક્તં પાપશમનં નામ હરિશઙ્કરસ્તોત્રમ્

મત્સ્યં નમસ્યે દેવેશં કૂર્મં દેવેશમેવ ચ ।
હયશીર્ષં નમસ્યેઽહં ભવં વિષ્ણું ત્રિવિક્રમમ્ ॥ ૨॥ ૧॥

નમસ્યે માધવેશાનૌ હૃષીકેષકુમારિલૌ ।
નારાયણં નમસ્યેઽહં નમસ્તે ગરુડાસનમ્ ॥ ૩॥
જયેશં નરસિંહં ચ રૂપધારં કુરુધ્વજમ્ ।
કામપાલમખણ્ડં ચ નમસ્યે બ્રાહ્મણપ્રિયમ્ ॥ ૪॥
અજિતં વિશ્વકર્માણં પુણ્ડરીકં દ્વિજપ્રિયમ્ ।
હરિં શમ્ભું નમસ્યે ચ બ્રહ્માણં સપ્રજાપતિમ્ ॥ ૫॥
નમસ્યે શૂલબાહું ચ દેવં ચક્રધરં તથા ।
શિવં વિષ્ણું સુવર્ણાક્ષં ગોપતિં પીતવાસસમ્ ॥ ૬॥
નમસ્યે ચ ગદાપાણિં નમસ્યે ચ કુશેશયમ્ ।
અર્ધનારીશ્વરં દેવં નમસ્યે પાપનાશનમ્ ॥ ૭॥
ગોપાલં ચ સવૈકુણ્ઠં નમસ્યે ચાપધારિણમ્ ।
નમસ્યે વિષ્ણુરૂપં ચ જ્યેષ્ઠેશં પઞ્ચમં તથા ॥ ૮॥

ઉપશાન્તં નમસ્યેઽહં માર્કણ્ડેયં સજમ્બુકમ્ ।
નમસ્યે પદ્મકિરણં નમસ્યે વડવામુખમ્ ॥ ૯॥
કાર્ત્તિકેયં નમસ્યેઽહં બાહ્લિકં શઙ્ખિનં તથા ।
નમસ્યે પદ્મકિરણં નમસ્યે ચ કુશેશયમ્ ॥ ૧૦॥

નમસ્યે સ્થાણુમનઘં નમસ્યે વનમાલિનમ્ ।
નમસ્યે લાઙ્ગલીશં ચ નમસ્યેઽહં શ્રિયઃ પતિમ્ ॥ ૧૧॥

નમસ્યે ચ ત્રિનયનં નમસ્યે હવ્યવાહનમ્ ।
નમસ્યે ચ ત્રિસૌવર્ણં નમસ્યે ધરણીધરમ્ ॥ ૧૨॥
ત્રિણાચિકેતં બ્રહ્માણં નમસ્યે શશિભૂષણમ્ ।
કપર્દિનં નમસ્યે ચ સર્વામયવિનાશનમ્ ॥ ૧૩॥

નમસ્યે શશિનં સૂર્યં ધ્રુવં રુદ્રં મહૌજસમ્ ।
પદ્મનાભં હિરણ્યાક્ષં નમસ્યે સ્કન્દમવ્યયમ્ ॥ ૧૪॥
નમસ્યેઽહં ભીમહંસૌ નમસ્યે હાટકેશ્વરમ્ ।
સદાહંસં નમસ્યે ચ નમસ્યે ઘ્રાણતર્પણમ્ ॥ ૧૫॥
નમસ્યે રુક્મકવચં મહાયોગિનમીશ્વરમ્ ।
નમસ્યે શ્રીનિવાસં ચ નમસ્યે પુરુષોત્તમમ્ ॥ ૨૬॥
નમસ્યે ચ ચતુર્બાહું નમસ્યે ચ સુધાધિપમ્ ।
વનસ્પતિં મધુપતિં નમસ્યે મનુમવ્યયમ્ ॥ ૧૭॥

શ્રીકણ્ઠં વાસુદેવં ચ નીલકણ્ઠં સદાશિવમ્ ।
નમસ્યે શર્વમનઘં ગૌરીશં લકુડેશ્વરમ્ ॥ ૧૮॥

મનોહરં ચ કૃષ્ણેશં નમસ્યે ચક્રપાણિનમ્ ।
યશોધનં મહાબાહું નમસ્યે ચ કુશપ્રિયમ્ ॥ ૧૯॥
ભૂધરં છાદિતગદં સુનેત્રં સુરશંસિતમ્ ।
ભદ્રાક્ષં વીરભદ્રં ચ નમસ્યે શઙ્કુકર્ણિનમ્ ॥ ૨૦॥
વૃષધ્વજં મહેશં ચ વિશ્વામિત્રં શશિપ્રભમ્ ।
ઉપેન્દ્રં ચ સગોવિન્દં નમસ્યે પઙ્કજપ્રિયમ્ ॥ ૨૧॥
સહસ્રશિરસં દેવં નમસ્યે કુન્દમાલિનમ્ ।
કાલાગ્નિં રુદ્રદેવેશં નમસ્યે કૃત્તિવાસસમ્ ॥ ૨૨॥
નમસ્યે છાગલેશં ચ નમસ્યે પઙ્કજાસનમ્ ।
સહસ્રાક્ષં કોકનદં નમસ્યે હરિશઙ્કરમ્ ॥ ૨૩॥
અગસ્ત્યં ગરુડં વિષ્ણું કપિલં બ્રહ્મવાઙ્મયમ્ ।
સનાતનં ચ બ્રહ્માણં નમસ્યે બ્રહ્મ તત્પરમ્ ॥ ૨૪॥
અપ્રતર્ક્યં ચતુર્બાહું સહસ્રાંશું તપોમયમ્ ।
નમસ્યે ધર્મરાજાનં દેવં ગરુડવાહનમ્ ॥ ૨૫॥
સર્વભૂતગતં શાન્તં નિર્મલં સર્વલક્ષણમ્ ।
મહાયોગિનમવ્યક્તં નમસ્યે પાપનાશનમ્ ॥ ૨૬॥
નિરઞ્જનં નિરાકારં નિર્ગુણં નિલયં પદમ્ ।
નમસ્યે પાપહર્તારં શરણ્યં શરણં વ્રજે ॥ ૨૭॥

એતત્ પવિત્રં પરમં પુરાણ
  પ્રોક્ત ત્વગસ્ત્યેન મહર્ષણા ચ ।
ધન્યં યશસ્યં બહુપાપનાશનં

સંકીર્તનાત્ સ્મરણાત્ સ્પર્શનાચ્ચ ॥ ૨૮॥ ૨૭॥

ઇતિ વામનપુરાણે અગસ્ત્યપ્રોક્તં પાપશમનં નામ હરિશઙ્કરસ્તોત્રં સમ્પૂર્ણમ્ ।

(vAmanapurANa, adhyAya 88, shlokas 2-28)

Proofread by Jonathan Wiener wiener78 at sbcglobal.net

---

*Harishankarastotram by Sage Agastya*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*